स्वाहा ।" अनेन मन्त्रेण बिल्वमरिचं घृताक्तं सहस्रहवनं कुर्यात्, समस्तजनपदाः किङ्करा भवन्ति । एतन्मन्त्रेण यदि न्यग्रोधसमिधं घृताक्तां सहस्रैकं होमयेत्, तदा स्त्री-वश्यं भवति ॥ "ॐ रौं ह्रीं ह्रूं ह्रूं एं वदवद वाग्वादिनी वागीश्वरी नमः स्वाहा ।" अनेन मन्त्रेण सहस्रजप्तेन कवित्वं करोति नात्र सन्देहः । "ॐ ॐ ॐ ईं ईं ईं ऐं ऐं ऐं नमः स्वाहा ।" अनेन मन्त्रेण दशसहस्रजप्तेन कवित्वं करोति ॥

इति श्रीशिवपार्वतीसंवादे वीरभद्रेश्वरतन्त्रोद्धृते
उड्डामरेश्वरमहातन्त्रे चतुर्थः पटलः ॥ ४ ॥

---

अथ

# पञ्चमः पटलः ।

शृणु पुत्र प्रवक्ष्यामि यथा त्रैलोक्यमोहनम् ।
परपुरुषा वशं यान्ति यथावत् कथयामि ते ॥ १ ॥
एला कुष्ठं च लोध्रं च वचा च रक्तचन्दनम् ।
श्मशानभस्मसंयुक्तं प्रयोगं मारणान्तकम् ॥ २ ॥

मारणं सङ्कोचकरणम् ।

कुलत्थं बिल्वपत्रं च रोचना च मनःशिला ।
एतानि समभागानि स्थापयेत् ताम्रभाजने ॥ ३ ॥
सप्तरात्रे स्थिते पात्रे तैलमेभिः पचेद् बुधः ।
तैलेन भगमालिप्य भर्तारमुपगच्छति ॥ ४ ॥
संप्राप्य मैथुनं भर्ता दासो भवति नान्यथा ।

नागरैः मधुसंयुक्तैर्गुटिकां कारयेद्बुधः ॥ ५ ॥
अश्वमूत्रेण संयुज्य पुरुषाणां वशंकरम् ।
कुङ्कुमं शतपुष्पं च प्रियङ्गु रोचनं ततः ॥ ६ ॥
अजाक्षीरेण दातव्यं या भार्या दुर्भगा भवेत् ।
ततः सा सुभगा नित्यं पतिदासत्वमाप्नुयात् ॥ ७ ॥
मातुलुङ्गस्य बीजानि पङ्कजस्य फलानि च ।
समुद्रजं रक्तचूर्णं मधुना सह लेपयेत् ॥ ८ ॥
तैलयोजितमात्रेण पतिर्दासो भवेद् ध्रुवम् ।
अधुना संप्रवक्ष्यामि योगानां सारमुत्तमम् ॥ ९ ॥
येन विज्ञातमात्रेण नारी भवति किङ्करी ।
उशीरं चन्दनं चैव मधुना सह संयुतम् ॥ १० ॥
गजहस्तप्रयोगोऽयं सर्वनारीप्रयोजकः ।
केवलं शशिना युक्तं कुङ्कुमं लेपयेद् भगे ॥ ११ ॥
निजवज्जायते साङ्गं जायते योनिसश्चयम् ।
लवङ्गं सैन्धवं क्षौद्रं पिप्पली मरिचानि च ॥ १२ ॥
नरस्य लेपयेद् गात्रं स भवेद् गजहस्तवत् ।
वरटावेश्मसम्बानं (?) शीततोयेन पेषयेत् ॥ १३ ॥
तेनैव लिप्तमात्रेण भगे रन्ध्रो न जायते ।
तत्र प्रक्षालितेनाथ प्रसवत्वं भविष्यति ॥ १४ ॥
यः स्वरेतः समादाय रत्यन्ते सव्यपाणिना ।
वामपादं स्त्रियो लिम्पेत् सा तस्य वशगा भवेत् ॥१५॥
या भोगशेषे कान्तस्य लिङ्गं वामाङ्घ्रिणा स्पृशेत् ।
यावदायुर्भवेद् दासः स तस्या नात्र संशयः ॥ १६ ॥
कपोतविष्ठा सिन्धूत्थमधुकैः समभागिकैः ।

लिप्त्वा लिङ्गं भजेद्यां तु सा वश्या स्याद्वराङ्गना ॥१७॥
घनसारं सतल्लव्यं मेढ्रं च मधुना सह ।
पिष्ट्वा लिप्त्वा रजो यां च भजेत्सा वश्यगा भवेत् ॥१८॥
रोचना कनकं शम्भुबीजं कर्पूरचन्दनम् ।
एभिर्विलिप्तलिङ्गो यां भजते सा वशा भवेत् ॥ १९ ॥

इति श्रीशिवपार्वतीसंवादे वीरभद्रेश्वरतन्त्रोद्धृते
उड्डामरेश्वरमहातन्त्रे पञ्चमः पटलः ॥ ५ ॥

---

अथ

# षष्ठः पटलः ।

कृष्णच्छागरोम-कृष्णमार्जाररोम-कृष्णकाकरोमाणि कृष्णाष्टम्यां कृष्णचतुर्दश्यां वा शनिभौमयोर्वारे ऽश्लेषानक्षत्रे आर्द्रानक्षत्रे वा समभागानि कृत्वा कूपतडागनदीपयसा पेषयित्वा गुटिकां कृत्वा संग्रामे चोपविशेत् । रणपांशुना तिलकं कुर्यात् । अथानन्तरं येऽन्ये पुरुषा दर्शनं कुर्वन्ति ते कम्पयन्ति मूर्च्छयन्ति उत्पतन्ति पलायन्ते । ये पिष्ट्वा लेपं कुर्वन्ति तेषां शु(त्व)चि कापि पतति न मुञ्चति ।

एष योगो मया प्रोक्तो देवानामपि दुर्लभः ।
निवेदनीयः कस्यापि न कदाचिदिति ब्रुवे ॥ १ ॥
अथातः संप्रवक्ष्यामि शरीरज्ञानमुत्तमम् ।
येन विज्ञानमात्रेण जायते च शुभाशुभम् ॥ २ ॥
जीवितं मरणं चैव लाभालाभं जयाजयम् ।

सुखदुःखं भवाभावौ गमनागमनं तथा ॥ ३ ॥
हिमालयसुता वै हि पृष्टवती वृषध्वजम् ।

अथ पृथिव्यप्तेजोवाय्वाकाशानि तत्त्वानि, तत्र गुरोर्बृहत्प्रसादेन शास्त्राणि च, येन योगेनातीतेन त्रैलोक्यं सचराचरं जातमेव । येषां समयोगानि स्थूलसूक्ष्माणि कथ्यन्ते । स च संप्रेत्य चेष्टायां लक्ष्यते, तस्याः किं नाम, तस्य च का जिज्ञासा यथापदुच्यते चाहुस्ततः पञ्चतत्त्वानि पठ्यन्ते । संप्रति दूतो यदागत्य वदति, तस्य वागुदेति, पञ्चतत्त्वाक्षराणि ज्ञात्वा यस्य तत्त्वाक्षरस्य वक्त्रे तत्त्वाक्षराणि भवन्ति प्रश्नचिन्तायां स तत्त्वं जपति । यदि प्रश्नचिन्तायां पृथिवीतत्त्वाक्षराणि भवन्ति तदा पृथ्वीतत्त्वं भवति । यद्येषामधिका भवन्ति, तदा पानीयतत्त्वानि भवन्ति, तत्त्वाक्षराणीत्यर्थः । 'अआइईउऊऋॠऌॡ' एतानि पृथ्वीतत्त्वाक्षराणि । 'एऐओऔअंअः' एतानि जलतत्त्वाक्षराणि । 'कखगघङचछजझञ' एतानि तेजस्तत्त्वाक्षराणि । 'टठडढणतथदधनपफबभम' एतानि वायुतत्त्वाक्षराणि । 'यरलवशषसह' एतान्याकाशतत्त्वाक्षराणि । एतानि वर्धितवाक्येनाधिकाक्षराणि भवन्ति । ………………… विविधप्रकारचिन्ताः, समविषमाक्षराणि (पृथ्वीतत्त्वानि) ज्ञातव्यानीति । जीवितमरणलाभालाभ-जयपराजय-सुखदुःखगमनागमनानि च यानि समानि विषमाणि अप्तत्त्वानि निर्वाचितव्यानि । यदा चित्तं भवति कृतस्य वाक्यविषये पृथिवीविषये, तदा सलिलतत्त्वाक्षराणि भवन्ति तदा स जप्तं जपति । अप्चिन्तायां यदा पृथिवीतत्त्वाक्षराणि भवन्ति,

तदा पृथ्वीतत्त्वं भवति। एवमन्येष्वपि बोद्धव्यम् । अक्षराणि येन कथयति । लाभचिन्तायां तेजआकाशाक्षराणि अधिकानि भवन्ति, तदा तेऽशुभोऽधिकतरो भविता । यदा देशात् ततत्वाद्वा गमनादिकं तेजसः ग्रामचलिते संग्रामगमने 'अहेतु-अके-डके' तैजसाक्षराण्यधिकानि भवन्ति। पृथिव्यप्तेजोवाय्वाकाशा एतेषामक्षराणि विवाहकाले एतेषु तेजोऽक्षराणि शुभहारकाणि भवन्ति ॥

इति श्रीशिवपार्वतीसंवादे वीरभद्रेश्वरतन्त्रोद्धृते
उड्डामरेश्वरमहातन्त्रे षष्ठः पटलः ॥ ६ ॥

---

अथ

## सप्तमः पटलः ।

अथौषधीकरणं निरूप्यते ।

ओषधी परमा श्रेष्ठा गोपितव्या प्रयत्नतः ।
यस्याः प्रयोगमात्रेण देवता यान्ति वश्यताम् ॥ १ ॥
ओषधी सा बुधैः प्रोक्ता चाण्डाली लोकविश्रुता ।
सुरासुरगणैः पूज्या सर्वकार्यार्थसाधिनी ॥ २ ॥
एकपत्री द्विपत्री च त्रिपत्री तुर्यपत्रिका ।
अनेन विधिना देवि चतुश्चरणगामिनी ॥ ३ ॥
मानुषाणां विशेषेण वश्यकर्मणि योजिता ।

एकपत्री तु स्वाङ्गमलसंयुक्ता स्त्रियं वशमानयति, द्विपत्री राज्ञो राजपुरुषान् । त्रिपत्री श्रीशाकमरिचसहिता

दुष्टां चमूं वशमानयति, चतुष्पत्री च कन्दुसहिता मत्त-दुष्टगजं वशमानयति ॥ अथोत्पाटनविधिः कथ्यते—

शनिवारे शुचिर्भूत्वा सायं सन्ध्यादिकं विधाय गन्ध-पुष्पधूपदीपनैवेद्यादिभिः पञ्चोपचारैः पूजादिकं विधाय, अक्षतं फलं हस्ते गृहीत्वा ओषधिसमीपे स्थित्वाभिमन्त्रणं कुर्यात्। ततोऽनुदिते भानौ खादिरकाष्ठकीलिकेन खनयेत् । तत्र मन्त्रः—"येन त्वां खनते ब्रह्मा हृषीकेशो महेश्वरः । शचीपतिः पितृपतिर्जलेशश्च धनाधिपः ॥ तेन त्वां खनयिष्यामि तिष्ठ तिष्ठ महौषधि ।" इति पठित्वा खनयेत् ॥

शुचिरारभ्य एकान्ते प्रभाते मन्त्रमुक्तितः ॥ ४ ॥
संग्राह्यमौषधं सिद्धयै न भवन्ति हि काष्ठवत् ।
नमोऽस्त्वमृतसंभूते बलवीर्यविवर्धिनि ॥ ५ ॥
बलमायुश्च मे देहि पापं मे नय दूरतः ।

येन चानेन मन्त्रेण खनित्वोत्पाद्यमानं कृत्वा यः पूर्व-मानीतो योऽन्यथा भवेत् ।

अत्रैव तिष्ठ कल्याणि मम कार्यकरी भव ॥ ६ ॥
मम कार्ये कृते सिद्धे इतस्त्वं हि गमिष्यसि ।

"ॐ ह्रीं रक्तचामुण्डे हूं फट् स्वाहा ।" अनेन मन्त्रेण पुष्यर्क्षे हस्तर्क्षे वा नक्षत्रे सर्वाश्चौषध्य उत्पाटनीयाः । यैर्नरैश्च उदिते भानौ ओषध्यः खन्यन्ते उत्पाट्यन्ते उत्पद्यन्ते वा, तासां रविकिरणपीतप्रभावेनावीर्यप्रभावो भवति । सिद्धिकारिका न भवन्ति । यद्युदिते भास्करे उत्पाट्यन्ते, तदा तासां पूजा कर्तव्या । जपारक्तोत्पलरक्तकरवीररक्त-चन्दनकुङ्कुमेन गव्यगोमयेन सपादहस्तभूमिं संलिप्य तन्मध्ये

चतुरस्रं कारयेत् । रक्तचन्दनकुङ्कुमाभ्यां तन्मध्ये वर्तुलं वितस्तिमात्रं भानुं पूजयेत् । पार्श्वे चन्द्रादिग्रहान् पूजयेत् । ततो रक्तभक्तपुष्पैर्वक्ष्यमाणमन्त्रेण बलिं दद्यात् । "ॐ द्रां द्रीं द्रूं द्रैं द्रौं द्रः सः स्वाहा ।" अनेन मन्त्रेण पूजां कृत्वोत्पाटयेत्, वीर्ययुक्ता भवति सर्वकार्यक्षमा भवति ॥

इति श्रीशिवपार्वतीसंवादे वीरभद्रेश्वरतन्त्रोद्धृते
उड्डामरेश्वरमहातन्त्रे चाण्डालीमहौषधिवर्णनं
सप्तमः पटलः ॥ ७ ॥

---

अथ

# अष्टमः पटलः ।

अथान्यत् संप्रवक्ष्यामि नारीणां गर्भधारणम् । पद्मबीजं गव्यपयसा सह या नारी पिबति सा गर्भवती भवति सत्यमेव , आदित्यवारे निमन्त्रयेत्, चन्द्रवारे भक्षयेत् । पूर्वदिग्भागस्थितं शरीषमूलं गव्यघृतेन सह ऋतुसमये भक्षयेत् सा संवत्सरेण गर्भवती भवति ।

अनपत्या च या नारि कपित्थं भक्षयेत् सदा ।
अभिमन्त्र्य तु मन्त्रेण सापि पुत्रवती भवेत् ॥ १ ॥
एकवृक्षतटे नारी स्नानं कृत्वाभिमन्त्रयेत् ।
आदिवन्ध्यापि देवेशि भवेद्गर्भवती हि सा ॥ २ ॥
देवः शिवो भवेद्यत्र नदीसङ्गमसन्निधौ ।
तस्यां नद्यां दिशि स्वाहा वन्ध्या पुत्रवती भवेत् ॥३॥

विधिरत्रोच्यते—

कपिलागोमयेनाथ भूमिं संलिप्य यत्नतः ।
स्नात्वा विधिप्रकारेण मण्डलं कारयेत् ततः ॥ ४ ॥
चतुरस्रं चतुष्कोणं तन्मध्ये वर्तुलं स्मृतम् ।
तन्मध्ये विलिखेत् पश्चादष्टपत्रं सकर्णिकम् ॥ ५ ॥
मध्ये तु पूजयेद् देवं पत्रे शक्तिं प्रपूजयेत् ।
निर्व्रणमण्डलस्याग्रे कमलं स्थापयेद् बुधः ॥ ६ ॥

शिखिपत्रनखवर्णेन लिखेत् । भृङ्गता कुलसप्तपर्वतमृत्तिका............ (?) स्वमलामृत्तिका-वल्मीकमृत्तिका-निम्बमूलमृत्तिका सुवर्णरजतताम्रकांस्य—सहस्रमूल—सर्वतीर्थानि, समुद्राः सरितः सर्वाः सर्वौषधयः सर्वदेवताः सर्वसिद्धयः सर्वयोगिन्यः सर्वे गिरयः सर्वे नागाः, पञ्चजात्यानि फलानि पञ्चप्रकाराक्षतानि पञ्च सुवर्णपुष्पाणि स्थिरचित्तेन मन्त्रितकलशे परिकल्पयेत् । अथ मन्त्रः— "क्षांक्षींक्षूंक्षैंक्षौंक्षः ।" अनेन मन्त्रेण या नारी विधानेन निरत (नियम) वर्जिता अब्रह्मचारिणी देवी वन्ध्या पञ्चपतिवर्जिता ।

अपुत्रा लभते पुत्रान् दुर्भगा सुभगा भवेत् ।
अनेनैव विधानेन कन्या प्राप्नोति सत्पतिम् ॥ ७ ॥
मन्त्रौषधीप्रयोगाश्च ये चान्ये चूर्णकीर्णकाः ।
नवाभिचारिताः क्रूराः शुद्धदेहा भवन्ति ते ॥ ८ ॥
ये चान्ये विघ्नकर्तारश्चरन्ति भुवि राक्षसाः ।
ते सर्वे प्रलयं यान्ति सत्यं देवि मयोदितम् ॥ ९ ॥
सकृदुच्चरिते मन्त्रे महापुण्यं प्रजायते ।
ब्रह्महत्यादयो दोषाः क्षयं यान्ति न संशयः ॥ १० ॥

अथ प्रथमोपाय उच्यते—नागकेसर १० माषकं गव्यघृतेन सहर्तुस्नानदिवसे पिबेत् । तदनन्तरं भर्त्रा सह रात्रौ संयोगं कुर्यात् । सा अवश्यमेव गर्भवती भवति ।

अथ द्वितीयोपायः—श्वेतजीरकं १७ माषमात्रकं रात्रौ मृण्मयपात्रे जलेन सह निरावरणस्थाने समग्ररात्रौ स्थापयेत् । अग्रिमदिवसे शिलायां पिष्ट्वा पर्युषितजलेन या स्त्री ऋतुस्नानदिने पीत्वा रात्रौ भर्त्रा सह संयोगं कुर्यादवश्यं सा गर्भवती भवति ।

अथ तृतीयोपायः—दकाल्वब्धदीपि १० माषकं गव्यदुग्धेन सह या ऋतुस्नानदिवसे पीत्वा रात्रौ भर्त्रा सह सयोगं कुर्यात् सा अवश्यमेव गर्भवती भवति । इति तृतीयोपायः ।

"ॐ घण्टाकर्णाय स्वाहा" इमं सप्तधा जप्त्वा ग्रामे नगरे वा प्रविशेत् तत्र विशिष्टं भोजनं प्राप्नोति । अन्यच्च "भो अल्ल मे सिद्धा" अनेनाष्टोत्तरशतं जपेत् । शिरीषमूलमृदः क्षेत्रस्य चतुष्कोणेषु मोक्षयेत् तदा शशकमूषकवराहचतुष्पादप्रभृतीनां मुखबन्धनं भवति ।

अधुना संप्रवक्ष्यामि मन्त्रान् मे फलदायकाः ।
ये सिद्ध्यति दशान्यूनं मन्त्रसाधनमुक्तिदाः ॥ ११ ॥

शत्रुमित्र–उदासीन–साध्यसिद्धस्य लक्षणम् ।

मन्त्राक्षराणि लिखित्वा साधकस्य तस्य यदापि च प्रथमवर्गाक्षरो भवति, तदा मित्रं, द्वितीयवर्गाक्षरो भवति तदा सिद्धः । तृतीयवर्गस्य यदा भवति, तदा साध्यः, चतुर्थवर्गाक्षरो भवति, तदोदासीनः, पञ्चमवर्गाक्षरो यदा भवति, तदा शत्रुर्ज्ञातव्यः । एतान् भेदान् ज्ञात्वा मन्त्रशोधनमारभेत् तदा साधकानां सुखावहो भवति॥

अथ कल्पवृक्षषण्डमूलानि यानि प्रक्षालितानि गव्यदधि-मिश्रितायां राजिकायां संस्कार्याणि । ततो नियमपूर्वकं भक्षयेत् । निर्व्याधियोगेष्वमुं स्वमुखे नियोजयेत् । विधानमस्या ब्रवीमीति देवी । अथ मन्त्रः—"ॐ नमः षण्मुखाय शक्तिहस्ताय मयूरवाहनाय औषधीकेन देहि मे भव स्वाहा।" अनेन मन्त्रेण चतुर्दश्यां शुचिर्भूत्वा मयूरशिखामुत्पाटयेत् तदा महाप्रभावयुक्ता भवति । गव्यघृतेन सह संगृह्येत तदा इन्द्रियबलो भवति । पञ्चमलेन स्वर्णकारो भवति ।

अन्यच्च—श्वेतकरवीरमूल-श्वेतगिरिकर्णिकामूल - हेवचनाङ्-भीकृतजाताञ्जली पञ्चमलसमायुक्ता खाने पाने प्रदातव्या मरणान्तं वशीकरणम् ॥

अन्यच्च—श्वेतगिरिकर्णिकामूलं स्ववीर्येण सह स्वकीय पञ्चमलहरवीर्य - श्वेतार्कमूलमेतानि हस्तर्क्षे पुष्यर्क्षे वा एकीकृत्य कुमारिकाहस्ताभ्यां मर्दयित्वा अष्टम्यां चतुर्दश्यां वा गजमदेन सह हस्ते गुटिकां कारयेत् । यस्यै एकापि दीयते सा वश्या भवति नान्यथा । शुक्लपक्षेऽपि सर्पाणां दीयते ते सर्पा अपि वश्या भवन्ति , श्रीमहाभैरवस्य वचो यथा, कुङ्कुमेन सह दीयते तदा वै गजो वशीभवति । रोचनया कुङ्कुमेन सह यदा तिलकं क्रियते तदा सा स्त्री पृष्ठलग्ना भ्रमति । गुरुदारेभ्यः तिलको न दर्शयितव्यः । राजद्वारे तथा न्याये विवाहे युद्धे जयावहे त्रैलोक्यमोहनमेतत् । त्रिफला ५ माषाः, निम्ब १ माष, कदम्ब २ माष, नीप ३ माष, तिराइता ४ माष, करञ्ज ५ माष, भृङ्गराज ६

माष, मयूरशिखा ७ माषाः, एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्। तदनन्तरं मधुना सह पेषयेत्। भोजनं च यथाहारं कुरुते नात्र संशयः। एतच्चूर्णं सुरेभ्योऽपि दुर्लभम्। रात्रिचूर्णं शिरीषवल्कलचूर्णं च गव्यघृतेन सह यस्यै वनितायै ऋतुस्नानदिवसे पानार्थं दीयते सा स्त्री वन्ध्यापि गर्भवती भवति नात्र संशयः। एतच्चूर्णं कपित्थफलेन सह ऋतुसमये अपुत्रवती भक्षयति सा स्त्री पुत्रमाप्नोति। एतच्चूर्णं श्वेतकङ्कोलीमूलं लक्ष्मणाचूर्णं च समं कृत्वा कुङ्कमक्काथेन सहर्तुसमये सदा भक्षणार्थं दीयते तदा तस्याः शरीरशुद्धिर्भवति। पश्चादृतुसमयोपरि पञ्च दिनानि भक्षयेत् तदा सा गर्भधारणक्षमा भवति नात्र संशयः॥

इति श्रीशिवपार्वतीसंवादे वीरभद्रेश्वरतन्त्रोद्धृते उड्डामरेश्वरमहातन्त्रे मयूरशिखानिरूपणमष्टमः पटलः॥ ८॥

---

अथ

# नवमः पटलः।

अथान्यत् संप्रवक्ष्यामि औषधं परमदुर्लभम्।
आस्फोटी नाम विख्याता नागदमनीति विश्रुता॥ १॥
अस्या विधानं वक्ष्यामि दुर्लभं त्रिदिवौकसाम्।
विषाः सर्वे विनश्यन्ति लेपनाद्धक्षणात् क्षणात्॥ २॥

पत्रहस्ते तां प्रलिप्य सर्पो म्रियते धृतमात्रे सर्पो न नश्यति, नैव क्षतानि, प्रलिप्य नागपूजितमन्त्रेण सर्पो विनश्यति।

नागदमनीमूलं खननान्नाडीललाटलेपनान्नाशयति समन्ततः आमवातं पित्तवातं श्लेष्मवातमेते वाता विनश्यन्ति भक्षणान्नात्र संशयः ॥

अथ कथयाम्योषधीकरणे करणकारणानि । पुत्रमय वशीकरणकारकपुत्रपुत्रं कंसं कातरापि वशं परं(?)महिलाजनस्यैकश अप्यस्य दीयते सा पतिं परित्यज्य पश्यतां लोकानां नग्ना भूत्वा भ्रमति ॥

अथ कथयामि तान्त्रिकविधिम् । ताम्रवेदीपरोर इति लोकैरुच्यते, शनिवारे तामभिमन्त्र्य दिगम्बरो मुक्तकेशो भूत्वानुदिते भानौ ग्रहणं कुर्यात् । पिष्ट्वा सम्यक्प्रकारेण स्त्रीपश्चमलेन च कामातुरेण कृत्वा ताम्बूलेन सह भगिनीकृत्वा दीयते सा वश्या भवति नान्यथा । मातापि पुत्रं परित्यज्य तत्परा भूत्वा पृष्ठतो नग्ना भवति यत्र कुत्रापि तथा तमनुयाति न संशयः ॥ काकजङ्घेति विख्याता महौषधिर्ग्रामे सर्वत्र तिष्ठति, शनिवारे सन्ध्यासमये तस्या अभिमन्त्रणं कुर्यात् तदन्तरं ब्राह्मे मुहूर्ते उत्थायानुदिते भानौ पुष्यर्क्षे हस्तर्क्षे वा योगे खदिरकीलकेन तां समूलामुत्पाटयेत् । पुनस्तां सप्तम्यामष्टम्यां नवम्यां वा एतासु तिथिषु पुनर्वसुपुष्यहस्तर्क्षयुक्तासु स्वपश्चमलेन सह पिष्ट्वा स्ववीर्यं स्वरक्तमपि तस्मिन् दत्त्वा यस्यै वनितायै दीयते सा स्त्री वश्या भवति सत्यमेव मन्त्रेणानेन मन्त्रयेत् । "ॐ नमो भगवति त्रिपुरे त्रैलोक्यमोहिनि ऐं द्रां श्रीं क्लीं सौं अमुकनाम्नीं शीघ्रं मे वशमानय स्वाहा ।" इति मन्त्रः ॥

अथ गुञ्जाकल्पो लिख्यते—श्वेतगुञ्जां शनिवारे सन्ध्या-

समयेऽभिमन्त्रितां कृत्वा ततो ब्राह्मे मुहूर्ते उत्थायानुदिते भानौ खादिरकीलकेन दिगम्बरो भूत्वा समूलामुत्पाटयेत्। पुष्यर्क्षे हस्तर्क्षे वा स्त्रीपुष्पेण सह गोरोचन-काश्मीरकुङ्कुमश्वेतचन्दन - रक्तचन्दन - कस्तूरी - कर्पूर-हस्तिमदेन सहाभिमन्त्र्य तिलकं कुर्यात् तदा स्त्री कामबाणविमोहिता विह्वला भवति । मन्त्रेणानेन मन्त्रयेत्—"ओं ऐं ह्रीं श्रीं क्लीं हूं फट् स्वाहा।" इति कामबाणतिलकम् ॥

अथान्यतन्त्रोक्तं वशीकरणादिकं लिख्यते—

सारमुद्धृत्य संक्षेपाद्वशीकरणमोहने ।
कामिनां प्रीतिजनकं किञ्चित्तदपि गद्यते ॥ ३ ॥

तत्रादौ तिलकविधिः ।

लज्जां मधूकं कव्यं च नलिनीमूलमेव च ।
एतान् पिष्ट्वा स्ववीर्येण यः कुर्यात् तिलकं पुमान् ॥४॥
तत्क्षणादेव नयति वश्यतां भुवनत्रयम् ।
वात्स्यायनेन मुनिना प्रोक्तं योगमनुत्तमम् ॥ ५ ॥
सिताष्टमूलमञ्जिष्ठा वचा मुस्ता सकुष्ठका ।
स्त्रीयोनिशोणिते चैतदेकीकृत्य ललाटके ॥ ६ ॥
शुभं तिलकमाधत्ते यः स लोकत्रयं क्रमात् ।
कृतज्ञः स्ववशं कुर्यान्मोदते च चिरं भुवि ॥ ७ ॥
तगरं पिप्पलीमूलं मेषीशृङ्गी कणा जटा ।
एतत्समं स्वपञ्चाङ्गमले नीत्वैकतां सुधीः ॥ ८ ॥
मधुना तिलकं कुर्याद्यः क्षोणीसुतवासरे ।
जगत्सर्वं वशीकुर्यात् स पुमान्नात्र संशयः ॥ ९ ॥
गोरोचनं च संभाव्य स्वपुंसो रुधिरेण या ।

कुर्यात् सा तिलकं भाले पतिं च मोहयेद्भृशम् ॥ १० ॥

अथाञ्जनविधिः—

महाष्टमीदिने यस्तु श्मशाने नरमस्तके ।
पातितं कज्जलं विश्वं मोहयेन्नयनाञ्जनात् ॥ ११ ॥
रोचनां केसरं कन्यां शिलां चेति विशोधयन् ।
योजयेद् दृष्टिपथगं सर्वमेव विमोहयेत् ॥ १२ ॥
तालीशकुष्ठनागरैः कृत्वा क्षोणीशवर्तिकाम् ।
सिद्धार्थतैले निःक्षिप्य कज्जलं नरमस्तके ॥ १३ ॥
पातयेदञ्जनं तस्य सर्वदा भुवनत्रये ।
दृष्टिगोचरमायातः सर्वो भवति दासवत् ॥ १४ ॥
शिलाकिञ्जल्कफलिनी रोचनानां तथाञ्जनम् ।
पुष्यर्क्षयोगे विहितं दंपत्योर्मोहनं परम् ॥ १५ ॥

इति । अथ चूर्णविधिः—

काकजङ्घा शिला पक्षौ भ्रामरौ कृष्णमुत्पलम् ।
चूर्णं तगरजं चैषां चूर्णं क्षिप्तं विमोहने ॥ १६ ॥
वातपैत्तिकदलं पुंसो मलं मालासवस्य च ।
पक्षावलेरिदं चूर्णं क्षिप्तं शिरसि मोहनम् ॥ १७ ॥

अथ भक्षणविधिः—

अन्त्रादि सर्वं निष्कास्य खञ्जरीटोदरं कुलैः ।
पूरयित्वा स्ववीर्येण सारमेयगले क्षिपेत् ॥ १८ ॥
मुद्रां कृत्वा तदेकान्ते सप्ताहं धारयेत् सुधीः ।
पश्चान्निष्कास्य संशोध्य वर्तीं कुर्याद्विशोषयेत् ॥ १९ ॥
सा भक्षणविधानेन दीपमाला परस्परम् ।
दंपत्योः प्रीतिजननी कीर्तिता नियमोत्तमा ॥ २० ॥

अन्यत्सुमतम् ।

अथान्यत् संप्रवक्ष्यामि तिलकं सर्वकामिकम् । गोरोचनं वंशलोचनं मत्स्यपित्तं काश्मीरकुङ्कुमकेसर-स्वयम्भूकुसुम-स्ववीर्य- श्रीखण्डरक्तचन्दनकस्तूरी - कर्पूर-काकजङ्घामूलानि समभागानि कृत्वा कूपनडागनदीजलेन मर्दयित्वा कुमारिकापार्श्वकां गुटिकां कृत्वा च्छायायां गुटिकां कारयेत् । तया ललाटे तिलकं कृत्वा यां यां स्त्रियं पश्यति सा सा वश्या भवति । "द्रौं वां धां त्रौं अं कं छः" इत्यनेन मन्त्रेण महिषास्थिमयं कीलकमेकोनविंशत्यङ्गुलं सहस्रेणाभिमन्त्रितं यस्य नाम्ना कूपतटे निखनेत् स महिषेण वध्यते॥"ॐ च्छः च्छः लृं अमुकं हुं ईं च्छः च्छः ॐ"इति। अनेन मन्त्रेण मयूरास्थिमयं कीलकं त्र्यङ्गुलं सहस्रेणाभिमन्त्रितं यस्य नाम्ना चतुष्पथे निखनेत् स तत्र भ्रमति । तत्रानेनावतिष्ठति पर्यटति क्षणमात्रेण उत्तोलनेन शान्तिर्भवति ॥"ॐ श्रीं श्रीं व्रां व्रीं ईं ईं च्छः च्छः स्वाहा ।" अनेन मन्त्रेण मेषास्थिमयं कीलकं द्वादशाङ्गुलं सहस्रेणाभिमन्त्रितं कृत्वा यस्य गृहे-निखनेत् सर्वसिद्धिरसिद्धा तस्य भवति ॥

द्रींबन्धूकपुष्पसङ्काशं ध्यातव्यं मन्त्रदीपके ।
कुम्भकेन वरारोहे शृणु वक्ष्यामि बड्गुणम् ॥ २१ ॥
ध्यात्वा तु मासमेकं तु महास्त्रीमानयेद् ध्रुवम् ।
मासेनैकेन मनुना आनयेन्नागकन्यकाम् ॥ २२ ॥
देवकन्यां त्रिभिर्मासैः सायाह्ने नान्यथा भवेत् ।
"ॐ हं हः इति ।"
अनेनैव तु मन्त्रेण ध्यातव्याः क्रोधयाजकाः ॥ २३ ॥

याज्यस्य रुद्रसङ्काशं रुद्रहस्तं सुरासुरैः ।
मासेन मानुषं लोकं नागलोकं द्विमासतः ॥ २४ ॥
त्रिभिर्मासैस्तु देवेशि स्वर्गलोकं न संशयः ।
षण्मासाभ्यासयोगेन त्रैलोक्यं निश्चलं कुरु ॥ २५ ॥

"ॐ रक्तहटा रक्तगटा मुकुटधारिणी एधति स्वाहा ।" मन्त्रराज उल्टा वेधा । "ॐ ह्रीं श्रीं ध्रीं विकृताननना बाह्ये फट् स्वाहा ।" मन्त्रमिमं यन्त्रे लिखित्वा यस्य ईप्सितं दीयते स ऐकाहिकद्व्याहिकत्र्याहिकविषमज्वरेण गृह्यते तत्क्षणादेव नश्यति नात्र संशयः॥ "ॐ बन्धुन क्षयं द्रीं द्रीं अमुकस्यास्मानं नित्यज्वरेण पत्रीबन्धनमात्रस्य स्फुर स्वाहा ।" इति नित्यज्वरशोधनपत्रिका ॥ "ॐ क्षः स्वाहा ।" अनेन मन्त्रेण मन्त्रितं जलं भृशं कृत्वा ज्वरिताङ्गं सेचयेत्, तेन ज्वरविमुक्तिर्भवति निश्चितम् ॥

खरवाहनसिंहस्य क्रमादेवानुशासनम् ।
ऋक्चतुरगगतो वायुर्जीमूत इव गर्जितः ॥ २६ ॥
रविवारे श्लोकमिमं लिखित्वा शिरसि न्यसेत् ।
तेन स्थापितमात्रेण त्रैमासिकज्वरं हरेत् ॥ २७ ॥
वानेयस्य बिडालस्य गृहीत्वा रुधिरं ततः ।
पद्मसूत्रोत्थवर्ति च भावयेत् सप्तवारकम् ॥ २८ ॥
शिवाग्रे तज्जतैलेन पातयेत् कज्जलं ततः ।
तेनाञ्जितलोचनस्तु अदृश्यो भवति ध्रुवम् ॥ २९ ॥

"हेभिरिहेभेरिहे ।" अनेनोदकमादायालोक्य सहस्रवारं परिजप्य अनेनैवाञ्जनेन त्रिरात्रेण सिद्धिः । पद्मसूत्रवर्तिकस्य तैलेन कज्जलं पातयेत्, तेनाञ्जितनेत्रस्तु अदृश्यो भवति ।

ततो गोमूत्रेण चक्षुषी प्रक्षाल्य पुनः प्रत्यक्षो भवति ॥

अथ डाकिनीदमनमन्त्रः—"अक्षः क्षां क्षौकाजसिनौ देवता तत्त्वधूलिनी घोनाशालिनी भमान्त्रि बन्धुशनादैवतं लघुकण्टकेन पुरुमभिशासनो देवतां महाभैरव मण्डलमचल (मङ्गलवारेण) ॐ च्छः च्छः च्छः डाकिनीमतबन्धु नमः । ॐ नमो भगवते वज्राय चण्डेश्वराय ईं ईं फट् स्वाहा ।" इति सर्वभूतडाकिनीदमनमन्त्रः ॥ "दमन सर्पलङ्ग एभलिसिमजबन्धनिशि नागपाशमचलः" इति दमनमन्त्रं बन्धनं च ॥ "ॐ रंस्त्रीं शीघ्रं ह स्वाहा ।" त्रिपुरां सिन्दूरशंखचूर्णाभ्यां उद्नालपत्रे लिखित्वा शोधयितव्यः स दिवसत्रयेण ज्वरेणागत्य मिलति । "ॐ अहोहः अमुकनाम्नीं शीघ्रमानय स्वाहा" इत्याकर्षणम् ॥

"ॐ स्त्रींस्त्रीं क्लीं क्लीं ईं अहः फट् स्वाहा ।" मज्जनस्वस्थो भवति । "अप्सरणीं अमुकीं जीव ।" तेन अनेन मन्त्रेण सप्तवारं जलं प्रजप्य कामिन्यै पानार्थं दातव्यम् । "ॐ नमो जले मोहे कुले फलानि संकुले स्वाहा ।" अनेन मन्त्रेण सप्तवाराभिमन्त्रितं यस्य दीयते स वश्यो भवति । "ॐ नमो जले मोहे द्रां अब्जिनि फट् स्वाहा ।" अनेन मन्त्रेण प्रत्यूषे पानीयेन मुखं प्रक्षालयेत् सर्वजनप्रियो भवति सर्वसिद्धीश्वरो भवति ॥

"ॐभूर्भुवः स्वः स्वाहा ।" ताम्बूलं मन्त्रयित्वा यस्य दीयते स वश्यो भवति ॥ "ॐ नमो जले मोहे हन हन दह दह पचपच मथमथ अमुकं मे वशमानय स्वाहा ॥"

अथ यक्षिणीमन्त्रसाधनम्— सुरसुन्दरी-मनोहारिणी-कन-

कावती-रतिकरी-कामेश्वरी-नटी-अनुरागिणी - पद्मिनी , एता अष्टौ यक्षिण्यः कामनायां साधनम् ।

अथ सुरसुन्दरीसाधनम्— "ॐ ह्रीं आगच्छ आगच्छ सुरसुन्दरि स्वाहा ।" वज्रपाणिगृहं गत्वा गुग्गुलधूपं दत्त्वा त्रिसंध्यं पूजयेत्, सहस्रं त्रिसंध्यं मासपर्यन्तं जपेत्, ततो मासाभ्यन्तरे प्रत्यक्षा भवति, अन्तिमदिने रक्तचन्दनेनार्घ्यं दद्यात् । तत आगत्य माता भगिनी भार्या वा भवति तासां यानि कर्माणि तान्येव करोति । यदि माता भवति तदा सिद्धद्रव्याणि रसायनानि ददाति । यदि भगिनी भवति तदा पूर्ववदमूल्यं वस्त्रं ददाति । यदि भार्या भवति तदा सर्वमैश्वर्यं परिपूरयति । परन्तु वर्जनीयमिहान्यया सह शयनं, सा च मैथुनप्रिया भवति, अन्यथा नश्यति ॥ १ ॥

अथ मनोहारिणीसाधनम्— "ॐ ह्रीं आगच्छ आगच्छ मनोहरि स्वाहा ।" इह नदीसङ्गमे गत्वा चन्दनेन मंण्डल कृत्वा अगुरुधूपं दत्त्वा सहस्रैकं मन्त्रं मासपर्यन्तं प्रत्यहं जपेत् । ततो मासान्ते चन्दनोदकेनार्घ्यं दद्यात्, पुष्पफलेनैकचित्तेन तस्या अर्चनं कर्तव्यं, ततोऽर्द्धरात्रसमये नियतमागच्छति, आगता सती तदाज्ञां करोति, सुवर्णशतं तस्मै साधकाय प्रत्यहं ददाति ॥ २ ॥

अथ कनकावतीसाधनम्— "ॐ ह्रीं कनकावति मैथुनप्रिये आगच्छ आगच्छ स्वाहा ।" वटवृक्षसमीपे स्थित्वा मद्यमांसादिनैवेद्यं तस्यै मूलमन्त्रेण दत्त्वा शेषं स्वयमप्यङ्गीकृत्य सहस्रमेकं मूलमन्त्रं जपेत् । एवं सप्तदिनपर्यन्तं कुर्यात् । अष्टम्यां रात्रावर्द्धरात्रसमये वस्त्रालङ्कारभूषिता अष्टौ

परिवारानादायोपगच्छति। आगता सा कामयितव्या भार्या वा भवति, द्वादशजनानां वस्त्रालङ्कारभोजनं च ददाति, अष्टौ कला नित्यं साधकाय प्रयच्छति ॥ ३ ॥

अथ कामेश्वरीसाधनम्— "ॐ ह्रीं आगच्छ आगच्छ कामेश्वरि स्वाहा।" इह गोरोचनया भूर्जपत्रोपरि स्त्रीरूपां प्रतिमां संलिख्य षोडशोपचारैः पञ्चोपचारैर्वा संपूज्य, ततः शय्यायामेकाकी एकान्ते उपविश्य तन्मना भूत्वा सहस्रं जपेत्, ततो मासान्ते तद्बुद्ध्या स्वकीयां भार्यां पूजयेत्। ततो मधुसर्पिर्भ्यां प्रतिरात्रं दीपं प्रज्वाल्य पश्चान्मौनं कृत्वा मूलमन्त्रं सहस्रसंख्यं जपेत्। ततोऽर्धरात्रसमये नियतमागच्छति, परन्त्वन्याः स्त्रियो वर्जनीयाः ॥ ४ ॥

अथ रतिप्रियासाधनम्— "ॐ ह्रीं आगच्छ आगच्छ रतिकारि स्वाहा ॥" अत्र पटे चित्ररूपिणी लेख्या वस्त्रकनकालङ्कारभूषिता उत्पलहस्ता कुमारी, जातीपुष्पैः प्रपूजनं कुर्यात्, गुग्गुलेन धूपं दद्यात्, ततोऽष्टसहस्रं प्रत्यहं जपेत्। मासान्ते तु विधिवत् पूजनं कुर्यात्। धूपदीपौ प्रज्वालनीयौ, ततोऽर्धरात्रसमयेऽवश्यमागच्छति, आगता सा स्त्रीभावेन कामयितव्या, भार्या भवति, साधकस्य परिवारं पालयति, दिव्यं कामिकं भोजनं च ददाति ॥ ५ ॥

अथ पद्मिनीसाधनम्— "ॐ ह्रीं आगच्छ आगच्छ पद्मिनि स्वाहा।" स्वगृहे चन्दनेन मण्डलं कृत्वा शिरःस्थं कारयेत्, गुग्गुलेन धूपं दत्त्वा सहस्रमेकं प्रत्यहं जपेत्, ततो मासान्ते पौर्णमास्यां रात्रौ विधिवत् पूजां कृत्वा जपेत्। जपान्तेऽर्धरात्रसमये नियतमागच्छति, आगता सा काम-

यितव्या भार्या भूत्वा सर्वकामप्रदा भवति, रसं रसायनं सिद्धद्रव्यं प्रत्यहं साधकाय प्रयच्छति ॥ ६ ॥

अथ नटीसाधनम्— "ॐ ह्रीं आगच्छ आगच्छ नटि स्वाहा।" अत्राशोकतले गत्वा मत्स्यमांसाद्याहारगन्धपुष्पादिधूपदीपबलिं दत्त्वा सहस्रं प्रत्यहं जपेत्, ततः सा मासान्ते नियतमागच्छति, आगता सा माता भगिनी भार्या वा भवति। यदि माता भवति तदा दिव्यं कामिकं भोजनं ददाति, वस्त्रसुगन्धिसुवर्णशतं ददाति च। यदि भगिनी भवति, तदा शतयोजनादुत्तमां स्त्रियमानीय ददाति। यदि भार्या भवति तदा दिव्यं वस्त्रं रसायनमष्टदिनान्तरेण ददाति ७

अथानुरागिणीसाधनम्— "ॐ ह्रीं अनुरागिणि आगच्छ आगच्छ स्वाहा।" इह काश्मीरकुङ्कुमेन भूर्जपत्रे स्त्रीसदृशीं प्रतिमां विलिख्यावाहनादिकं कृत्वा गन्धपुष्पधूपदीपादिकं दत्त्वा ताम्बूलानि निवेद्य सहस्रं प्रत्यहं जपेत्। मासमेकं त्रिसंध्यं जपेत्, मासान्ते पौर्णमास्यां विधिवत् पूजां कृत्वा घृतदीपं प्रज्वाल्य समग्ररात्रौ मन्त्रं प्रजपेत्। ततः प्रभातसमये नियतमागच्छति, आगता सा सर्वकामप्रदा भवति, दिव्यरसायनानि ददाति, प्रत्यहं च दीनाराणां सहस्रं ददाति। तस्याः प्रसादेन वर्षसहस्राण्यायुश्च भवति ॥ ८ ॥

अथ षट्त्रिंशद्यक्षिण्यः—

विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिनी।
विशाला मदना घण्टा कालकर्णी महाभया ॥ १ ॥
माहेन्द्री शंखिनी चान्द्री श्मशाना वटयक्षिणी।
मेखला विकला लक्ष्मीर्मालिनी शतपत्रिका ॥ २ ॥

सुलोचना सुशोभाढ्या कपालिनी विशालिनी ।
नटी कामेश्वरी स्वर्णरेखा च सुरसुन्दरी ॥ ३ ॥
मनोहरा प्रमोदानुरागिणी नखकेशिका ।
भामिनी पद्मिनी चैव स्वर्णावती रतिप्रिया ॥ ४ ॥
षट्त्रिंशदेता यक्षिण्यः कथिताः सिद्धिकामदाः ।
करङ्किणीमते तन्त्रे महादेवेन विस्तरात् ॥ ५ ॥
आराधनं महत् तासां प्रवक्ष्यामि समासतः ।
फलं चैव यथा तुष्टाः प्रयच्छन्ति समाहितम् ॥ ६ ॥
(१) लक्षद्वयं जपेन्मन्त्रं वटवृक्षतले शुचिः ।
पश्चाच्चम्पकपुष्पैश्च होमं मधुघृतान्वितम् ॥ ७ ॥
कुर्याद् दशांशतो मन्त्री शंकरेणोदितं यथा ।
ततः सिद्धा भवेद् देवि विचित्रा वाञ्छितप्रदा ॥ ८ ॥
"ॐ विचित्रे चित्ररूपिणि मे सिद्धिं कुरु २ स्वाहा।" इति मन्त्रः
(२) लक्षद्वयं जपेन्मन्त्रं श्मशाने निभृते निशि ।
घृताक्तैर्गुग्गुलैर्होमे दशांशेन कृते सति ॥ ९ ॥
विभ्रमा तोषमायाति पञ्चाशन्मानुषैः समम् ।
ददाति भोजनं द्रव्यं प्रत्यहं शङ्करोऽब्रवीत् ॥ १० ॥
"ॐ ह्रीं विभ्रमे विभ्रमङ्गरूपे विभ्रमं कुरु रहिं २ भगवति स्वाहा।"
(३) प्रदेशे नगरस्याथ लक्षसंख्यं जपेन्मनुम् ।
पद्मपत्रैर्घृतोपेतैः कृते होमे दशांशतः ॥ ११ ॥
प्रयच्छत्यञ्जनं हंसी येन पश्यति भूनिधिम् ।
सुखेन तं च गृह्णाति न विघ्नैः परिभूयते ॥ १२ ॥
"ॐ ह्रीं नमो हंसि हंसवाहिनि क्लीं क्लीं स्वाहा ।"
(४) त्रिपथस्थो जपेन्मन्त्रं लक्षसंख्यं दशांशतः ।

घृताक्तगुग्गुलैर्होमे भीषणी चिन्तितप्रदा ॥ १३ ॥
"ॐ ऐं ह्रीं महामोदे भीषणि द्रांद्रां स्वाहा ।"
(५) कदम्बाधो जपेन्मन्त्रं निशि लक्षद्वयं ततः ।
घृताक्तगुग्गुलैर्होमे देवी सौभाग्यदा भवेत् ॥ १४ ॥
"ॐ ह्रीं क्लीं जनरञ्जिके स्वाहा ।"
(६) बिल्ववृक्षतले मन्त्रं लक्षमावर्तयेच्छुचिः ।
शतपत्रोद्भवैः पुष्पैः सघृतैर्होममाचरेत् ॥ १५ ॥
ततः सिद्धा भवेद् देवि विशालाकाशगामिनी ।
ददाति मन्त्रिणे तुष्टा रसं दिव्यरसायनम् ॥ १६ ॥
"ॐ ऐं ह्रीं विशाले स्त्रांस्त्रीं एह्येहि स्वाहा ।"
(७) लक्षसंख्यं जपेन्मन्त्रं राजद्वारे स्थितः शुचिः ।
सक्षीरमालतीपुष्पैः कृते होमे दशांशतः ॥ १७ ॥
मदनायक्षिणी तुष्टा गुटिकां संप्रयच्छति ।
यया आस्यस्थयादृश्यः शुचिः स्थायी भवेन्नरः ॥ १८ ॥
"ॐ ह्रीं मदने मदनविडम्बिनि आलये सङ्गमं देहि देहि श्रीं स्वाहा ।"
(८) सुघण्टां वादयन्मन्त्री जपेन्मन्त्रायुतद्वयम् ।
तत्र क्षोभयते लोकान् दर्शनादेव साधकः ॥ १९ ॥
"ॐ ऐं ह्रीं पुरीं क्षोभय प्रजाः क्षोभय भगवति गम्भीर-स्वने स्वप्ने स्वाहा ।"
(९) लक्षसंख्यं मनुं जप्त्वा पलाशतरुजेन्धनैः ।
मधुनाक्तैः कृते होमे कालकर्णी प्रसीदति ॥ २० ॥
सौख्यं ददाति तुष्टा वै गतिस्तम्भकरी भवेत् ।
सततं संस्मरेन्मन्त्री विविधाश्चर्यकारिणीम् ॥ २१ ॥

"ॐ हुं कालकर्णि ठः ठः स्वाहा ।"

(१०) अस्थिमुद्राधरो लक्षं श्मशाने प्रजपेन्मनुम् ।
ततो महाभया सिद्धा यच्छत्यस्य रसायनम् ॥ २२ ॥
तेन भक्तिनमात्रेण पर्वतानपि चालयेत् ।
वलीपलितनिर्मुक्तो न रोगं समवाप्नुयात् ॥ २३ ॥

"ॐ द्रीं महाभये प्रें स्वाहा ।"

(११) शक्रचापोदये लक्षं निर्गुण्डीतुलसीस्थितः ।
जपेन्मन्त्रं ततः सिद्धा भवेत् पातालसिद्धिदा ॥ २४ ॥

"ॐ ह्रीं माहेन्द्रि मन्त्रसिद्धिं कुरु कुरु कुलु २ हंसः सोहं स्वाहा"

(१२) मन्त्रायुतं जपेन्मन्त्री सति भानूदये शुचिः ।
शङ्खमालिकया पश्चादिन्धनैः करवीरजैः ॥ २५ ॥
घृताक्तैः होमयेन्मन्त्री दशांशेन शुचिस्ततः ।
ध्रुवं सिद्धा भवेद् देवी शङ्खिनी वाञ्छितप्रदा ॥ २६ ॥

"ॐ ह्रीं शंखधारिणि शंखधारणे द्रां द्रीं क्लीं श्रीं स्वाहा ।"

(१३) एवं चान्द्र्याः साधनमपि बोध्यम् ।

(१४) चतुर्लक्षमिमं मन्त्रं श्मशाने प्रजपेच्छुचिः ।
नग्नव्रतोऽञ्जनं तुष्टा श्मशाने संप्रयच्छति ॥ २७ ॥
तेन पश्येन्नरोऽदृश्यो विचरेद्वसुधातले ।
निधिं पश्यति गृह्णाति न विघ्नैः परिभूयते ॥ २८ ॥

"ॐ द्रांद्रीं श्मशानवासिनि स्वाहा ।"

(१५) त्रिपथस्थो वटाधःस्थो रात्रौ मौनी जपेत्तु वै ।
लक्षत्रयं ततः सिद्धा देवी स्याद्वटयक्षिणी ॥ २६ ॥
वस्त्रालङ्करणं दिव्यं रससिद्धिं रसायनम् ।
दिव्याञ्जनं च संतुष्टा साधकस्य प्रयच्छति ॥ ३० ॥

"ओं श्रीं द्रीं वटवासिनि यक्षकुलप्रसूते वटयक्षिणि एह्येहि स्वाहा ।"

(१६) मधूकवृक्षतले मन्त्रं चतुर्दशदिनावधि ।
प्रजपेन्मेखला तुष्टा ददात्यञ्जनमुत्तमम् ॥ ३१ ॥

"ओं द्रीं हुं मदनमेखलायै मदनविडम्बनायै नमः स्वाहा ।"

(१७) गुहान्तःस्थोऽधरे मासत्रयं मन्त्रं जपेन्नरः ।
ततः सिद्धा भवेद्देवि विकला वाञ्छितप्रदा ॥ ३२ ॥

"ओं विकले ऐं ह्रीं श्रीं क्लीं स्वाहा ।"

(१८) स्वगृहावस्थितो रक्तैः प्रसूनैः करवीरजैः ।
लक्षमावर्तयेन्मन्त्री दूर्वाज्याभ्यां दशांशतः ॥ ३२ ॥
होमे कृते भवेत् सिद्धा लक्ष्मीनाम्नी च यक्षिणी ।
रसं रसायनं दिव्यं निधानं च प्रयच्छति ॥ ३३ ॥

"ओं ऐं ह्रीं श्रीं लक्ष्मि कमलधारिणि हंसः सोहं स्वाहा।"

(१६) चतुष्पथस्थितो लक्षमापदि प्रजपेन्मनुम् ।
मालिनी जायते सिद्धा दिव्यं खड्गं प्रयच्छति ॥ ३४॥
यत्प्रभावेन लोकेऽस्मिन् दुर्लभं राज्यमाप्नुयात् ।

"ओं द्रीं ओं नमो मालिनी स्त्रि एह्येहि सुन्दरि हंसहंसि समीहं मे सङ्गभय स्वाहा ।"

(२०) शतपत्रवने यस्तु मन्त्रलक्षं जपेन्मुनिः ।
क्षीराज्यहोमैः संसिद्धा सिद्धिं यच्छति भूनिधिम् ॥३५॥

"ओं द्रीं शतपत्रिके द्रीं द्रीं श्रीं स्वाहा ।"

(२१) नदीतीरस्थितो लक्षत्रयं मन्त्री जपेन्मनुम् ।
घृतहोमे दशांशेन कृते देवी प्रसीदति ॥ ३६ ॥
ददाति पादुकां तस्मै यथारुचि नभस्तले ।

मनःपवनवेगेन याति चायाति साधकः ॥ ३७ ॥
"ओं ह्रीं क्लीं सुलोचने सिद्धिं मे देहि देहि स्वाहा ।"
(२२) रक्ताम्बरधरो मन्त्री चतुर्दशादिनावधि ।
जपेत् सिद्धा भवेद् देवी शोभना भोगदायिनी ॥ ३८ ॥
"ओं ह्रीं अशोकपल्लवकरतले शोभने श्रीं क्षः स्वाहा ।"
(२३) महाव्रतधरो मन्त्री यः शाल्योदनभोजनैः ।
लक्षद्वयं जपेन्मन्त्रं कपालं लभते मुनिः ॥ ३९ ॥
आकाशगमनं दूरात् स्वप्नरूपसमागमः ।
दूराद्दर्शनमित्यादि साधकाय प्रयच्छति ॥ ४० ॥
"ओं ऐं कपालिनी ह्रां ह्रीं क्लां क्लीं क्लूं क्लैं क्लौं क्लः हंसः सोहं सकलह्रीं फट् स्वाहा ।"
(२४) सरित्तीरे जपेन्मन्त्रमर्धं लक्षस्य देशिकः ।
घृताक्तगुग्गुलैर्होमे देवी सौभाग्यदा भवेत् ॥ ४१ ॥
"ओं वरयक्षिणि वरयक्षविशालिनि आगच्छ २ प्रियं मे भवतु हैमे भव स्वाहा ।"
(२५) पुण्याशोकतलं गत्वा चन्दनेन सुमण्डलम् ।
कृत्वा चाभ्यर्चयेद् देवीं धूपं दत्त्वा सहस्रकम् ॥ ४२ ॥
मन्त्रमाराधयेन्मासं नक्तभोजी रसः सदा (?) ।
रात्रौ पूजां शुभां कृत्वा जपेन्मन्त्रं मुनिव्रतः ॥ ४३ ॥
नटी देवी समागत्य निधानं रसमञ्जनम् ।
ददाति मन्त्रिणे मन्त्रं दिव्ययोगं च सिद्धिदम् ॥ ४४ ॥
"ओं ह्रीं नटि महानटि रूपवति ह्रीं स्वाहा ।"
(२६) एकासने शुचौ देशे त्रिसंध्यं त्रिसहस्रकम् ।
मासमेकं जपेन्मन्त्रं तदा पूजां समारभेत् ॥ ४५ ॥

पुष्पैर्धूपैश्च नैवेद्यैः प्रदीपैर्घृतपूरितैः ।
रात्रौ देवीं समभ्यर्च्य जपेन्मन्त्रं प्रसन्नधीः ॥ ४६ ॥
अर्धरात्रे गते देवी समागत्य प्रयच्छति ।
रसं रसायनं दिव्यं वस्त्रालङ्करणानि च ॥ ४७ ॥
"ॐ ह्रीं आगच्छ आगच्छ कामेश्वरि स्वाहा ।"
(२७-२८) (स्वर्णलेखा ! सुरसुन्दरी च प्रागुक्ता)
(२९) नदीतीरे शुभे रम्ये चन्दनेन सुमण्डलम् ।
विधाय पूजयेद् देवीं ततो मन्त्रायुतं जपेत् ॥ ४८ ॥
एकविंशतिघस्रान्तं प्रसन्ना वितरेत् सदा ।
अर्धरात्रे गते देवी दीनाराणां सहस्रकम् ॥ ४९ ॥
ददाति प्रत्यहं तस्मै व्ययं कुर्याद् दिने दिने ।
तद्व्ययाभावतो भूयो न ददाति प्रकुप्यति ॥ ५० ॥
"ॐ ह्रीं सर्वकामदे मनोहरे स्वाहा ।"
(३०) अर्धरात्रे समुत्थाय सहस्रं प्रजपेन्मनुम् ।
मासमेकं ततो देवी निधिं दर्शयति ध्रुवम् ॥ ५१ ॥
"ॐ ह्रीं प्रमोदायै स्वाहा ।"
(३१) कुङ्कुमेन समालिख्य भूर्जे देवीं सुलक्षणाम् ।
प्रतिपत्तिथिमारभ्य धूपदीपादिभिर्वराम् ॥ ५२ ॥
कृत्वा देवीं सहस्रं च त्रिसंध्यं परिवर्तयेत् ।
मासमेकं ततः पूजां रात्रौ कृत्वा पुनर्जपेत् ॥ ५३ ॥
अर्धरात्रे गते देवी समागत्य प्रयच्छति ।
दीनाराणां सहस्रैकं प्रत्यहं परितोषिता ॥ ५४ ॥
"ॐ अनुरागिणि मैथुनप्रिये यक्षकुलप्रसूते स्वाहा ।"
(३२) गत्वा पक्षिगृहं मन्त्री नखकेशैः प्रपूजयेत् ॥ ५५ ॥

दिनैकविंशतिर्यावत् पूजां कृत्वा ततो निशि ।
आवर्तयेदेकचित्तो मन्त्री मन्त्रं सुसंयतः ॥ ५६ ॥
निशार्धे वाञ्छितं कार्यं देव्यागत्य प्रयच्छति ।
"ॐ ह्रीं नखकेशिके स्वाहा ।"
(३३) दिनत्रयमनाहारी सोमसूर्यग्रहे सति ॥ ५७ ॥
स्पर्शाद्विमुक्तिपर्यन्तं जपेत् तद्गतमानसः ।
ततः प्रसन्ना सा देवी यच्छत्यञ्जनमुत्तमम् ॥ ५८ ॥
तेनाञ्जितो नरोऽदृश्यं निधिं पश्यति भूगतम् ।
"ॐ ह्रीं यक्षिणि भामिनि रतिप्रिये स्वहा ।"
(३४) (पद्मिनी प्रागुक्ता ३५ पृ०)
(३५) वटवृक्षतले कृत्वा चन्दनेन सुमण्डलम् ॥ ५९ ॥
यक्षिणीं पूजयित्वा तु नैवेद्यमुपदर्शयेत् ।
शशमांसं घृतं क्षीरं मन्त्रमावर्तयेत् ततः ॥ ६० ॥
दिने दिने सहस्रैकं यावत् सप्तदिनं भवेत् ।
अथागत्य सदा तस्मै मन्त्रमञ्जनमुत्तमम् ॥ ६१ ॥
यत्प्रभावान्तरे सर्वं पश्येन्निधिमशङ्कितः ।
"ॐ ह्रीं आगच्छ २ स्वर्णावति स्वाहा ।"
(३६) शङ्खलिप्तपटे यस्माद् देवीं गौरीं धृतोत्पलाम् ॥६२॥
सर्वालङ्कारिणीं दिव्यां समालिख्यार्चयेन्नरः ।
जातीपुष्पैः प्रपूज्याथ सहस्रं परिवर्तयेत् ॥ ६३ ॥
सप्ताहं मन्त्रवित् तस्याः कुर्यादर्चां शुभां ततः ।
अर्धरात्रे गते देवी समागत्य प्रयच्छति ॥ ६४ ॥
पञ्चविंशतिदीनारान् प्रत्यहं परितोषिता ।
वाञ्छितं मनसस्तस्मै मन्त्रज्ञाय न संशयः ॥ ६५ ॥
"ॐ ह्रीं रतिप्रिये स्वाहा ।"

इति श्रीपार्वतीश्वरसंवादे वीरभद्रेश्वरतन्त्रोद्धृते
उड्डामरेश्वरतन्त्रे यक्षिणीपटलः नवमः ॥ ९ ॥

---

अथ

## दशमः पटलः ।

तत्र चेटकसाधनम् । अथ चेटका लिख्यन्ते—

कामातुरेण चित्तेन निशि मन्त्रं जपेत् सदा ।
जप्तोऽवश्यं वश्यकरो मन्त्रोऽयं नात्र संशयः ॥ १ ॥

"ओं ऐं स्कीं क्लीं क्लीं सहवल्लरि क्लीं कामपिशाच क्लीं ह्रीं कामपिशाच अमुकीं कामिनीं कामयाम्यहं तां कामेन ग्राहय २ स्वप्ने मम रूपे नखैर्विदारय २ द्रावय २ अस्त्रेण बन्धय २ श्रीं फट् स्वाहा ।"

जपेन्मासत्रयं मन्त्रं कम्बलः सुप्रसन्नधीः ।
मृतकोत्थापनं कुर्यात् प्रतिमां चालयेत्तथा ॥ २ ॥

"सदारक्तकम्बल महादेवदूत मृतकमुत्थापय २ प्रतिमां चालय २ पर्वतान् कम्पय २ लीलया विलसय २ ईं ईं फट् स्वाहा ।"

चतुर्लक्षं जपेन्मन्त्रं सागरस्य तटे शुचिः ।
पत्रपुष्पफलादीनि करोत्याकर्षणं ध्रुवम् ॥ ३ ॥

"अभय घुद्घुताकर्ष कर्मकर्ता सृष्टिपुत्र अमुकं आकर्षय द्रीं ।"

सहस्राष्टमिमं मन्त्रं जपेत् सप्तदिनावधि ।
प्रत्यहं मणिभद्राख्यः प्रयच्छत्येकरूप्यकम् ॥ ४ ॥

"ओं नमो मणिभद्राय नमः पूर्णभद्राय नमो महायक्षाय

सेनाधिपतये मौद्धमौद्धधराय सुघटमुद्रावहे स्वाहा ।"

त्रिसंध्यं बलिदान च निशायां प्रजपेन्मनुम् ।

सहस्र हि जपेन्नित्यं यावत् स्वप्नं प्रजायते ॥ ५ ॥

प्राणिनां मृत्युसमयं वदत्येव न संशयः ।

"ॐ नमो भगवते रुद्राय देहि मे वचनसिद्धिविधानं पार्वतीपते हां ह्रीं हूं ह्रैं ह्रौं ह्रः ।"

रात्रौ रात्रौ जपेन्मन्त्रं सागरस्य तटे शुचिः ।

लक्षजापे कृते सिद्धो दत्ते सागरचेटकः ॥ ६ ॥

रत्नत्रयं तदा मौन्यं यस्मिन्मन्त्री सुखी भवेत् ।

सहस्रदशकं नित्यं रात्रौ मन्त्रं जपेत् सुधीः ॥ ७ ॥

तद्दशांशं मधुपयोमिश्रैः पद्मैश्च होमयेत् ।

"ॐ नमो भगवते रुद्र देहि मे निजराशिं श्रीं नमोऽस्तु ते स्वाहा ।" "ॐ ह्रीं अमुकं रञ्जय स्वाहा ।" अनेन मन्त्रेण सर्वजनास्तस्मात् तु रञ्जका भवन्ति, निशाचरं ध्यात्वा आत्मपाणिना जपनाददृश्यकारिणीं विद्यामाप्नोति ॥ "ॐ नमो रसाचारिणे महेश्वराय मम पर्यटने सर्वलोकलोचनानि बन्धय २ देव्याज्ञापयति स्वाहा ।" सकृदुच्चारमात्रेण नृसिंहचेटकाख्यो मन्त्रो डाकिन्यादिदोषं नाशयति । "ॐ नमो भगवते हिरण्यकशिपुबलविदारणाय त्रिभुवनव्यापकाय भूतप्रेतपिशाच-कूष्माण्डब्रह्मराक्षसयोगिनी-डाकिनी - कुलोन्मूलनाय स्तम्भोद्भवाय समस्तदोषान् नाशय २ विसर २ कम्पय २ मथ २ हूं हूं स्वाहा, एह्येहि रुद्र आज्ञापयति स्वाहा ।" प्रेरकः सहस्रपादः अनिद्रामाकर्षयति । "ॐ प्रेरक अमुकीं तव मंण्डलं समावर्तय द्रावय दाहय संतापय ह्रौं॥"

इति श्रीपार्वतीश्वरसंवादे वीरभद्रेश्वरतन्त्रोद्धृते उड्डामरेश्वरमहातन्त्रे यक्षिणीचेटकनिरूपणं दशमः पटलः ।१०।

---

अथ

# एकादशः पटलः ।

अथ दिग्बन्धनमन्त्रः—"वज्रक्रोधाय महादन्ताय दशदिशो बन्ध बन्ध हूं फट् स्वाहा ॥" अथ योनिसंकोचनम्—

कुमुदं हरितालं च पिष्ट्वा योनिं प्रलेपयेत् ।
त्रिरात्रं पञ्चरात्रं च योनिर्भवति संयुता ॥ १ ॥
मांसी चन्दनमुस्ता च तगरं नागकेसरम् ।
एभिर्मासप्रयोगं च भगलेपनमुत्तमम् ॥ २ ॥
मालतीकुसुमैस्तैलैर्वल्कैर्वराङ्गलेपनम् ।
ऋतुकालेऽथवा कुर्यात् तदा तत्तुल्यता भवेत् ॥ ३ ॥
डिम्बस्यानीय पञ्चाङ्गं सर्षपतैलपाचितम् ।
सततमभिलेपेन सा भर्तारं वशं नयेत् ॥ ४ ॥
मूलं तु वानरीशृङ्गं छागीमूत्रेण लेपयेत् ।
लेपनात्तु ततः शिश्नं यथेच्छं कामयेद्बलात् ॥ ५ ॥
सौभाग्यपिप्पली लाक्षा विषं च क्रमवार्द्धितम् ।
लेपं प्रक्षालितं लिङ्गं नारी कामयते चिरात् ॥ ६ ॥
पारावतं तथा गुञ्जा श्वेतोत्पलं समाक्षिकम् ।
नाभिलेपनमित्युक्तं वीर्यस्तम्भकरं परम् ॥ ७ ॥
द्वादशारं लिखेच्चक्रं कुङ्कुमेन समन्वितम् ।

भूर्जपत्रेऽथवा वस्त्रे नेत्रे बद्धफलादिके ॥ ८ ॥
पत्रे पत्रे लिखेद्बीजं ह्रींकारं परमोज्ज्वलम् ।
साध्यनाम तथा मध्ये कर्णिकायां विशेषतः ॥ ९ ॥
विदर्भमन्त्रमुख्येन तत्कूटं परिमण्डले ।
मृत्तिकाभिः समस्ताभिः प्रतिमां कारयेद् दृढम् ॥ १० ॥
कर्षयेत् प्रमदां नृणां गर्वितां तु न संशयः ।
वैराग्यं न पुनर्याति दासीभावेन तिष्ठति ॥ ११ ॥
दाडिमं पञ्चकोलं च लोहं वज्रोरसं[1] घृतम् ।
चूर्णं भूमन्दरा शाखा दन्तनखं करोति वै ॥ १२ ॥
मनःशिला प्रयङ्गुश्च रोचना नागकेसरम् ।
नेत्राञ्जनसमायुक्तं सर्वसत्त्ववशङ्करम् ॥ १३ ॥

इति श्रीपार्वतीश्वरसंवादे वीरभद्रेश्वरतन्त्रोद्धृते उड्डामरेश्वरमहातन्त्रे योनिसंकोचनादिनिरूपणमेकादशः पटलः ॥ ११ ॥

---

अथ

## द्वादशः पटलः ।

"ओं ह्रीं श्रीं क्लीं द्रं चण्डोग्रे त्रिनेत्रे चामुण्डे अरिष्टे हूँ फट् स्वाहा। ह्रीं नमाम्यहं महादेवं नृसिंहं भीमरूपिणं ओं नमस्तस्मै"

श्रीपार्वत्युवाच ।

उड्डीशेन समाकीर्णे योगिवृन्दसमाकुले ।
प्रणम्य शिरसा गौरी परिपृच्छति शङ्करम् ॥ १ ॥

---

१ "वज्रसैर्युतम् पाठान्तरम्" ।

श्रीईश्वर उवाच ।

शृणु त्वं हि वरारोहे सिद्ध्यर्थं प्रतिवासरे ।
तं वदिष्यामि ते देवि सर्वं तत्समुपाहृतम् ॥ २ ॥
देवि यो द्विजो मन्त्रैस्तु विप्रहन्यान्न संशयः ।
पूर्वोदितं मयोड्डीशं कथ्यते तव भक्तितः ॥ ३ ॥
उड्डीशं च नमस्कृत्य रुद्रं चैव सुदुर्जयम् ।
कपर्दिनं विरूपाक्षं सर्वभूतभयावहम् ॥ ४ ॥
प्रथमं भूतकरणं द्वितीयोन्मादनं तथा ।
तृतीयं द्वेषणं चैव तुर्यमुच्चाटनं तथा ॥ ५ ॥
ग्रामोच्चाटं पञ्चमं च षष्ठं च जलस्तम्भनम् ।
सप्तममग्निस्तम्भं च वशीकरणमष्टमम् ॥ ६ ॥
अन्यानपि प्रयोगांश्च शृणुष्व वै वरानने ।
शिवेन कथिता योगा उड्डीशे शास्त्रनिश्चये ॥ ७ ॥
अन्धी च वन्धीकरणं मूकीकारस्तथैव च ।
गात्रसंकोचनं चैव भूतज्वरकरस्तथा ॥ ८ ॥
अस्त्रशस्त्रस्य त्रुटितं पानीयस्य विनाशनम् ।
दधिमधुनाशनं च नखकरणं तथैव च ॥ ९ ॥
गजानां वाजिनां चैव प्रकोपनं परस्परम् ।
आकर्षणं भुजङ्गानां मानवानां तथा ध्रुवम् ॥ १० ॥
सस्यविनाशनं चैव गर्भस्यान्तर्धिकारणम् ।
वेतालाञ्जनसिद्धिश्च उलूकसिद्धिरपि हि ॥ ११ ॥
अन्यानपि महारौद्रान् प्रयोगान् शृणु साम्प्रतम् ।
विद्यामन्त्रप्रयोगांश्च औषधं चाभिचारिकम् ॥ १२ ॥
गुप्ता गुप्ततराः कार्या रक्षितव्याः प्रयत्नतः ।

अकुलीनाधमबुद्धेर्भक्तिहीनस्य वै तथा ॥ १३ ॥
हिंसकस्य च क्षुद्रस्य निन्दकस्य विशेषतः ।
स्वार्थं फलादिलुब्धस्य उपदेशममन्यतः ॥ १४ ॥
अस्मिन् शापे(स्त्रे) पूरुषास्ते वर्जनीयाः प्रयत्नतः ।
एतैश्च सह संयोगो न कार्यः सर्वदा बुधैः ॥ १५ ॥
य उड्डीशक्रियाशक्तिभेदं कुर्वन्ति मोहिताः ।
ते दुष्टा दुर्जयाश्चैव किमत्र बहुभाषितैः ॥ १६ ॥
यदीच्छासिद्धिमात्मानमात्मार्थं हि तथैव च (?) ।
सत्पूरुषाय दातव्यं देवगुरुरताय च ॥ १७ ॥
प्रयोगास्तु प्रयोक्तव्याः साधकैः शत्रुकारणे ।
अनिमित्ता निवर्तन्ते स्वात्मग्राहे न संशयः ॥ १८ ॥
असंन्तुष्टो ह्ययुक्तश्च प्रयोगानिति नाचरेत् ।
शास्त्रसिद्धविचारास्तु सामन्तकोषकाः ? शुभाः ॥ १९ ॥
"ओं ग्लौं गं गणेशाय नमः ।"
मन्त्रेणानेन मन्त्रज्ञः कुम्भकारमृदा तथा ।
लम्बोदरं प्रकुर्वीत पूजयेदुपचारकैः ॥ २० ॥
साप्ताहिकं त्रिसंध्यायां जप्तव्यं सावधानतः ।
सहस्रैकप्रमाणेन जपाच्छान्तिर्भविष्यति ॥ २१ ॥
प्रातरष्टोत्तरं जप्त्वा लभेद् बुद्धिं शुभां नरः ।
मासेनैकेन देवेशि श्रीलाभश्च भवेद् ध्रुवम् ॥ २२ ॥
षण्मासेन वरारोहे महाधनपतिर्भवेत् ।
त्रिकालज्ञानवेत्ता च वर्षैकेन न संशयः ॥ २३ ॥
"ऐं नमः स्वाहा ।"
प्रातः सहस्रवारं तु प्रजप्तेन प्रपूजयेत् ।

वरदां तु महादेवीं श्वेतगन्धानुलेपनैः ॥ २४ ॥
पुष्पैर्जपैर्दक्षिणादिसोपचारैस्तु प्रत्यहम् ।
सप्तमे दिवसे ह्येवं वागैश्वर्यं प्रजायते ॥ २५ ॥
भवेत् सद्यः प्रवक्ता च श्रुतिस्मृतिधरोऽपि च ।
बान्धवः सर्वभूतानां चिरायुः सुखमेधते ॥ २६ ॥
"ॐ क्लीं"
मन्त्रेणानेन देवेशि साधकः जपमारभेत् ।
रक्तवस्त्रावृतो नित्यं तथा कुङ्कुमजाङ्गले ॥ २७ ॥
सप्ताहजपमात्रेण ह्यानयेत् त्रिदशाङ्गनाम् ।
"ॐ द्रीं द्रीं द्रीं द्रीं स्वाहा ।"
पूर्वविधानपूतो हि जपेदेकान्तसंस्थितः ॥ २८ ॥
आकर्षति स्त्रियं शस्तां सालङ्कारां सुवाससम् ।
"ॐ हैं हः हुं ।"
ऊर्ध्वदृष्टिप्रयोगेण जपेल्लक्षत्रयं प्रिये ॥ २९ ॥
सर्वपापविनिमुक्तो जायते खेचरे पदे ।
"ॐ द्रीं कारीण्डः क्षः क्षीं फट् स्वहा ।"
एकपादस्थितो भद्रे जपेदष्टोत्तरं शतम् ॥ ३० ॥
यद्यत् प्रार्थयते वस्तु तद् ददाति दिने दिने ।
यजेन्नरविशेषं च देवाग्निगुरुब्राह्मणैः ॥ ३१ ॥
"ॐ श्रीं क्षीं लोहं मुञ्च किलि किलि अमुकं काटय काटय मातङ्गिनि स्वाहा ।"
मन्त्रेणानेन पूर्वाह्ले पूजयन्नुपचारकैः ।
शरावं पूरयित्वा तु चतुष्पथे बलिं हरेत् ॥ ३२ ॥
समन्त्रं क्षिप्यति पुमान् पुरुषं यदि पश्यति ।

आत्मचिन्तितकार्याणि साधयत्येव नान्यथा ॥ ३३ ॥
"ओं स्तम्भिनि स्वाहा, कपालिनि स्वाहा, ह्रीं ह्रीं वैषादार्थिनि स्वाहा छः छः ।"
मन्त्रेण मृत्तिकां जप्त्वा प्रतार्य सप्तधा जले ।
संमुखीभूय क्षिप्त्वा च जप्त्वा चायुतं ? वासरे ॥ ३४ ॥
तेन सिद्धो भवेन्मन्त्रः साधकस्य न संशयः ।
"ओं श्रीं क्षां क्षीं क्षूं क्षैं क्षौं क्षः ।"
मध्याह्नसमये सूर्यसंमुखे जपमाचरेत् ॥ ३५ ॥
अयुतं जप्तमात्रेण स्वसामर्थ्यं प्रपश्यति ।
तस्य दृष्टिनिपातेन द्विपदश्च चतुष्पदः ॥ ३६ ॥
ज्वराभिभूता जायन्ते अपूर्वा मन्त्रसंपदः ।
"ओं हंसः हंसं सोहं स्वाहा ।"
एकविंशतिजप्तेन जलेन ज्वरपीडितः ॥ ३७ ॥
विमुच्यते पानमात्रात् सद्यः स्वस्थश्च जायते ।
"ओं ह्रीं नमो घोरेश्वरि घोरमुखि चामुण्डे ऊर्ध्वकेशि विकृतानने ह्रीं ह्रीं हुं फट् हुं स्वाहा ।" अयं सर्वदलनमन्त्रः ॥
"ओं ह्रीं ह्रीं ह्रीं फट् फट् फट् स्वाहा सर्वग्रहाणां त्रासनं कुरु कुरु अङ्गुलिप्रहारेण ।, ओं स्रूं स्रां स्रिं स्रीं स्रुं स्रूं स्रें स्रैं स्रों स्रौं स्रं स्रः ह रं रौं रीं रूं रैं रेविः छुं छुं हंसः अमृतवर्चसे स्वाहा ।" अनेन मन्त्रेणोदकं शरावे संक्षिप्याष्टोत्तरशतेनाभिमन्त्रितं कृत्वा पिबेत् प्रातरुत्थाय संवत्सरेण वलीपलितवर्जितो भवति। वृद्धस्थावरजङ्गमाकृतिं समाङ्गीकाराच्च व्याघ्रलोमादिकं पूर्वोदर्या भस्मीकरोति सर्वजनप्रियो भवति चिरायुर्भवति ।

"ॐ नमो भगवते रुद्राय चण्डेश्वराय हुं हुं हुं फट् स्वाहा।" अनेन मन्त्रेण जपं कृत्वा शीघ्रमीप्सितं लभेत्। "ॐ ह्रूं द्रीं चं चां चिं चीं चुं चूं चें चैं चों चौं चं चः ह्रूं फट् स्वाहा।" इमं मन्त्रं पूर्वं लक्षमेकं जपेत्, तद्दशांशमयुतं हवनं कुर्यात्। एकैकं समिधं घृताक्तां जुहुयात् सिद्धो भवति, गङ्गागोलोके न ते मेघाः प्रणश्यन्ति नच वर्षन्ति, वासवो नदसमुद्रं शोषयति, मेघस्तम्भो भवति। उदकमध्ये स्थित्वा जपं करोत्यनावृष्टिकालेऽतिवृष्टिं करोति। "ॐ द्रीं प्रचलिते कुवेरे ह्रूं ह्रूं किलि किलि स्वाहा।" पूर्ववेलायामादर्शदीपसमीपे षडङ्गुलेन भाजनं सूर्यमण्डले कुमारं वामे वेशयति, पूर्वमयुतजपः कर्तव्यः पञ्चोपचारेण पूजा च कर्तव्या पूर्वाभिश्च (?) स्वराज्ये। "ॐ श्रीं हिमजाते प्रयच्छ मे धनं स्वाहा।" अनेन मन्त्रेण सिद्धार्थकं घृतमिश्रितं हुनेत् अष्टोत्तरशतेन, अन्नपानविमिश्रितं सहस्रेण हुनेत् मनसः प्रार्थितं लभेत्, अयुतं हुनेच्छ्रीसुमना भवेत्, लक्षं हुनेद् ग्रामशतं लभेत्॥ "ॐ नमोनमः।" इमं मन्त्रं शतं जपेत्, सर्वकामप्रदोऽयं मन्त्रः॥ "ॐ द्रीं श्रीं सारसे सिद्धिकरि क्रीं नमः स्वाहा।" इमं मन्त्रं लक्षमेकं जपेद्रक्तकरवीरैश्च पूजयेत् सततं, सर्वकामदोऽयं मन्त्रः॥ "ॐ द्रुं चें चें हुं चः अमुकं चः स्वाहा।" अनेन मन्त्रेण राजिकालवणतुषकण्टकशिवनिर्माल्यं कटुतैलेन युतं हुनेत्, समस्तस्त्रीभाजनं भवति॥ "ॐ हुं हुं हुं लूं लं हुं लौं हुं लः अमुकं छः छः स्वाहा।" अनेन मन्त्रेण सिद्धार्थं भस्मना सह मान्त्रितं कर्तव्यं यस्य गृहे प्रक्षिप्य मन्त्रबलिपार्श्वैराक्षिपेत् तस्य बाहु-

स्तम्भो भवति । रिपुसैन्याग्रे क्षिपेत् शत्रुसैन्यस्तम्भो भवति, अश्वगजनरा निश्चेष्टा भवन्ति, विकला भवन्ति, समन्तादेवाकुला भवन्ति ॥

"ॐ रुं रुं मुखे स्वाहा ।" अनेन मन्त्रेण जप्ततैलेन मुखं प्रक्षाल्य तिलतैलेन गात्राभ्यङ्गं वा विधाय वातादिकं दिनसप्तकेन नश्यति । "ऐं मातङ्गि विमलावति विकराले द्रीं छः छः स्वाहा ।" अनेन मन्त्रेण जपापुष्पं परिजप्य वारिणि नद्यादौ होमयेत्, सप्ताहेन ईप्सितं फलं लभेत् ।

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रभृत् ।
तन्नामकीर्तनादेव हृतं नष्टं च लभ्यते ॥ ३८ ॥
नित्यं नित्यं जपेत् किञ्चिद्दियां वित्तस्य प्राप्तये ।

"ॐ मं किणि स्वाहा ।" इति वृश्चिकमन्त्रः । "ॐ हुं हुं हंसः हंसं सोहं सोहं स्वाहा ।" इति सर्वविषापहरणमन्त्रः । मयूरपिच्छेन कुशेन शरेण शरदण्डेन वा तद्देहे संमार्जनं कुर्यात्॥

"हं हां हिं हीं हुं हूं हें हैं हों हौं हं हः छः छः स्वाहा ।" इमं गोक्षीरसदृशं वारं वारं विचिन्तयेद्वा वराननमुखे शिरसि शरीरे ततः कण्ठे ततो हृदि नाभिमण्डले गुह्ये तथा सर्वाङ्गे चिन्तयेत्तथा पूरकेण वरारोहे कण्ठदष्टोऽपि जीवति ।

"ॐ गं गणपतये महागणपतये विघ्नहराय मतङ्गसंभवाय लम्बोदराय गौरीप्रियपुत्राय ह्रीं गां नमः रं हं क्षः स्वाहा ।" गोरोचना-विषराजिका–पिप्पली-नीचयवैर्महातैलैन सह देवदत्तैश्च लक्षितानालिखेत्, निम्बकाष्ठेन प्रतिकृतिं कृत्वा पृष्ठतो लिखेत् सद्यो ज्वरविलोपो भवति शान्तिर्भवति ॥

इति श्रीशिवपार्वतीसंवादे वीरभद्रेश्वरतन्त्रोद्धृते

उड्डामरेश्वरमहातन्त्रे मन्त्रकोषनिरूपणं
द्वादशः पटलः ॥ १२ ॥

---

अथ

# त्रयोदशः पटलः ।

